रथपतिभ्यश्च । रथपतिभ्य इति रथपति = भ्य : । च व : । वो नम : । नमो नम : । नम
स्सेना भ्य :। सेना भ्य स्सेनानिभ्य :। सेनानिभ्यश्च । सेनानिभ्य इति सेनानि = भ्य : । च व :।
वो नम : । नमो नम : । नम : - क्षत्तृभ्य : । क्षत्तृभ्य स्सङ्ग्रहीतृभ्य : । क्षत्तृभ्य इति क्षत्तृ =
भ्य : । सङ्ग्रहीतृभ्यश्च । सङ्ग्रहीतृभ्य इति सङ्ग्रहीतृ = भ्य :। च व :। वो नम :। नमो नम :।
नम स्तक्षभ्य : । तक्षभ्यो रथकारेभ्य : । तक्षभ्य इति तक्ष = भ्य : । रथकारेभ्यश्च । रथकारेभ्य
इति रथ = कारेभ्य : । च व : । वो नम : । नमो नम : । नम : कुलालेभ्य : । कुलालेभ्य :

कमरि॑भ्य॒ः। कमरि॑भ्यश्च। च॒ व॒ः। वो॒ नम॑ः। नमो॒ नम॑ः। नम॑ः पु॒ञ्जिष्टे॑भ्य॒ः। पु॒ञ्जिष्टे॑भ्यो

नि॒षादे॑भ्य॒ः। नि॒षादे॑भ्यश्च। च॒ व॒ः। वो॒ नम॑ः। नमो॒ नम॑ः। नम॑ इषुकृ॒द्भ्य॑ः। इ॒षु॒कृद्भ्यो॑

ध॒न्व॒कृद्भ्य॑ः। इ॒षु॒कृद्भ्य इतीषुकृत् = भ्य॒ः। ध॒न्व॒कृद्भ्य॑श्च। ध॒न्व॒कृद्भ्य इति॑ ध॒न्व॒कृत् = भ्य॒ः।

च॒ व॒ः। वो॒ नम॑ः। नमो॒ नम॑ः। नमो॑ मृग॒युभ्य॑ः। मृ॒ग॒युभ्य॑ः श्व॒निभ्य॑ः। मृ॒ग॒युभ्य इति॑

मृ॒ग॒यु = भ्य॒ः। श्व॒निभ्य॑श्च। श्व॒निभ्य इति॑ श्व॒नि = भ्य॒ः। च॒ व॒ः। वो॒ नम॑ः। नमो॒ नम॑ः।

नम॒ः श्वभ्य॑ः। श्वभ्य॒ः श्वप॑तिभ्यः। श्वभ्य इ॒ति श्व = भ्य॒ः। श्वप॑तिभ्यश्च। श्वप॑तिभ्य

इ॒ति श्वप॑ति = भ्य॒ः। च॒ व॒ः। वो॒ नम॑ः। नम इ॒ति नम॑ः ।।४।।

नमो॑ भ॒वाय॑। भ॒वाय॑ च। च रु॒द्राय॑। रु॒द्राय॑ च। च॒ नम॑ः। नम॑ श्श॒र्वाय॑। श॒र्वाय॑ च। च॒

प॒शु॒पत॑ये। प॒शु॒पत॑ये च। प॒शु॒पत॑य इति॑ प॒शु = पत॑ये। च॒ नम॑ः। नमो॒ नील॑ग्रीवाय। नील॑ग्रीवाय

च। नील॑ग्रीवा॒येति॒ नील॑ = ग्री॒वा॒य। च॒ शि॒ति॒कण्ठा॑य। शि॒ति॒कण्ठा॑य च। शि॒ति॒कण्ठा॒येति॑ शि॒ति

= कण्ठाय । च नमः । नमः कपर्दिने । कपर्दिने च । च व्युप्तकेशाय । व्युप्तकेशाय च । व्युप्तकेशायेति व्युप्त = केशाय । च नमः । नमस्सहस्राक्षाय । सहस्राक्षाय च । सहस्राक्षायेति सहस्र = अक्षाय । च शतधन्वने । शतधन्वने च । शतधन्वन इति शत = धन्वने । च नमः । नमो गिरिशाय । गिरिशाय च । च शिपिविष्टाय। शिपिविष्टाय च । शिपिविष्टायेति शिपि = विष्टाय। च नमः । नमो मीढुष्टमाय । मीढुष्टमाय च । मीढुष्टमायेति मीढुः = तमाय । चेषुमते । इषुमते च। इषुमत इतीषु = मते । च नमः । नमो ह्रस्वाय । ह्रस्वाय च । च वामनाय । वामनाय च । च नमः। नमो बृहते । बृहते च । च वर्षीयसे । वर्षीयसे च । च नमः । नमो वृद्धाय । वृद्धाय च। च सँवृद्ध्वने । सँवृद्ध्वने च । सँवृद्ध्वन इति सम् = वृद्ध्वने । च नमः । नमो - अग्रियाय । अग्रियाय च । च प्रथमाय। प्रथमाय च । च नमः । नम आशवे । आशवे च । चा जिराय । अजिराय च । च नमः। नम श्शीघ्रियाय । शीघ्रियाय च । च शीभ्याय। शीभ्याय च । च नमः।

नम ऊर्म्याय । ऊर्म्याय च । चावस्वन्याय । अवस्वन्याय च । अवस्वन्या येत्यव = स्वन्याय । च नम : । नम : स्रोतस्याय । स्रोतस्याय च । च द्वीप्याय । द्वीप्याय च । चे ति च ।।५।।

नमो ज्येष्ठाय । ज्येष्ठाय च । च कनिष्ठाय । कनिष्ठाय च । च नम : । नम : पूर्वजाय । पूर्वजाय च । पूर्वजायेति पूर्व = जाय । चापरजाय । अपरजाय च । अपरजायेत्यपर = जाय । च नम : । नमो मद्ध्यमाय । मद्ध्यमाय च । चापगल्भाय । अपगल्भाय च । अपगल्भायेत्यप = गल्भाय । च नम :। नमो जघन्याय । जघन्याय च । च बुध्नियाय । बुध्नियाय च । च नम :। नम स्सोभ्याय। सोभ्याय च । च प्रतिसर्याय । प्रतिसर्याय च । प्रतिसर्यायेति प्रति = सर्याय । च नम : । नमो याम्याय । याम्याय च । च क्षेम्याय । क्षेम्याय च । च नम : । नम उर्वर्याय । उर्वर्याय च । च खल्याय । खल्याय च । च नम : । नम : श्लोक्याय । श्लोक्याय च । चाव सान्याय । अवसान्याय च । अवसान्यायेत्यव = सान्याय । च नम : । नमो वन्याय । वन्याय च । च कक्ष्याय । कक्ष्याय

च । च नमः । नमः श्रवाय । श्रवाय च । च प्रतिश्रवाय । प्रतिश्रवाय च । प्रतिश्रवायेति प्रति = श्रवाय । च नमः । नम आशुषेणाय । आशुषेणाय च । आशुषेणायेत्याशु = सेनाय । चाशुरथाय। आशुरथाय च । आशुरथायेत्याशु = रथाय । च नमः । नम श्शूराय । शूराय च । चावभिन्दते । अवभिन्दते च। अवभिन्दत इत्यव = भिन्दते । च नमः। नमो वर्मिणे । वर्मिणे च । च वरूथिने । वरूथिने च । च नमः। नमो बिल्मिने । बिल्मिने च । च कवचिने । कवचिने च । च नमः । नमः श्रुताय । श्रुताय च । च श्रुतसेनाय । श्रुतसेनाय च । श्रुतसेनायेति श्रुत = सेनाय । चे ति च ।।६।।

नमो दुन्दुभ्याय । दुन्दुभ्याय च । चा हनन्याय । आहनन्याय च । आहनन्यायेत्या = हनन्याय । च नमः। नमो धृष्णवे । धृष्णवे च । च प्रमृशाय । प्रमृशाय च । प्रमृशायेति प्र = मृशाय । च नमः। नमो दूताय । दूताय च । च प्रहिताय । प्रहिताय च । प्रहितायेतिप्र = हिताय । च नमः । नमो

निषङ्गिणे । निषङ्गिणे च । निषङ्गिण इतिनि = सङ्गिने । चेषुधिमते । इषुधिमते च । इषुधिमत इतीषुधि = मते । च नमः । नमस्तीक्ष्णेषवे । तीक्ष्णेषवे च । तीक्ष्णेषव इति तीक्ष्ण = इषवे । चा युधिने । आयुधिने च । च नमः । नमः स्वायुधाय । स्वायुधाय च । स्वायुधायेति सु = आयुधाय । च सुधन्वने । सुधन्वने च । सुधन्वन इति सु = धन्वने । च नमः। नम : स्रुत्याय । स्रुत्याय च । च पथ्याय । पथ्याय च । च नमः। नमः : काट्याय । काट्याय च । च नीप्याय। नीप्याय च । च नमः : । नम स्सूद्याय । सूद्याय च । च सरस्याय । सरस्याय च । च नमः : । नमो नाद्याय । नाद्याय च । च वैशन्ताय । वैशन्ताय च । च नमः : । नम : कूप्याय । कूप्याय च । चा वट्याय । अवट्याय च । च नमः। नमो वर्ष्याय । वर्ष्याय च । चा वर्ष्याय । अवर्ष्याय च । च नमः। नमो मेघ्याय । मेघ्याय च । च विद्युत्याय । विद्युत्याय च । विद्युत्यायेति वि = द्युत्याय। च नमः : । नम ईध्रियाय । ईध्रियाय च । चा तप्याय । आतप्याय च । आतप्यायेत्या = तप्याय।

च नम॑ : । नमो वात्या॑य । वात्या॑य च । च रेष्मि॑याय । रेष्मि॑याय च । च नम॑ :। नमो॑ वास्तव्या॑य। वास्तव्या॑य च । च वास्तुपा॑य । वास्तुपा॑य च । वास्तुपायेति॑ वास्तु = पा॑य । चे ति॑ च ।।७।।

नम स्सोमा॑य । सोमा॑य च । च रुद्रा॑य । रुद्रा॑य च । च नम॑ : । नम॑ स्ताम्रा॑य । ताम्रा॑य च । चा रुणा॑य । अरुणा॑य च । च नम॑ : । नम॑ श्शङ्गा॑य । शङ्गा॑य च । च पशुपत॑ये । पशुपत॑ये च । पशुपत॑य इति॑ पशु = पत॑ये । च नम॑ : । नम॑ उग्रा॑य । उग्रा॑य च । च भीमा॑य । भीमा॑य च । च नम॑ : । नमो॑ - अग्रेवधा॑य । अग्रेवधा॑य च । अग्रेवधायेत्य॑ग्रे = वधा॑य । च दूरेवधा॑य । दूरेवधा॑य च । दूरेवधायेति॑ दूरे = वधा॑य । च नम॑ : । नमो॑ हन्त्रे । हन्त्रे च॑ । च हनी॑यसे । हनी॑यसे च । च नम॑ : । नमो॑ वृक्षेभ्य॑ : । वृक्षेभ्यो हरि॑केशेभ्य : । हरि॑केशेभ्यो नम॑ : । हरि॑केशेभ्य इति हरि॑ = केशेभ्य : । नम॑ स्तारा॑य । ताराय नम॑ :। नम॑ श्शम्भवे॑॑ । शम्भवे॑ च । शम्भव इति॑ शम् =भवे॑॑ । च मयोभवे॑॑ । मयोभवे॑ च । मयोभव इति॑ मय : = भवे॑॑ । च नम॑ : । नम॑ श्शङ्क॑रा॑य । शङ्क॑रा॑य

च । शङ्करायेति शम् = कराय । च मयस्कराय । मयस्कराय च । मयस्करायेति मय : = कराय । च नम : । नम श्शिवाय । शिवाय च । च शिवतराय । शिवतराय च । शिवतरायेति शिव = तराय । च नम : । नम स्तीर्त्थ्याय । तीर्त्थ्याय च । च कूल्याय । कूल्याय च । च नम :। नम : पार्याय । पार्याय च । चा वार्याय । अवार्याय च । च नम : । नम : प्रतरणाय । प्रतरणाय च । प्रतरणायेतिप्र = तरणाय । चोत्तरणाय । उत्तरणाय च । उत्तरणायेत्युत् = तरणाय । च नम : । नम आतार्याय । आतार्याय च । आतार्यायेत्या = तार्याय । चा लाद्याय । आलाद्याय च । आलाद्यायेत्या = लाद्याय । च नम :। नम श्शष्प्याय । शष्प्याय च । च फेन्याय । फेन्याय च । च नम : । नम स्सिकत्याय । सिकत्याय च । च प्रवाह्याय । प्रवाह्याय च । प्रवाह्यायेति प्र = वाह्याय । चे ति च ॥८॥

नम इरिण्याय । इरिण्याय च । च प्रपथ्याय। प्रपथ्याय च । प्रपथ्यायेति प्र = पथ्याय । च नम :।
नम : किꣳशिलाय । किꣳशिलाय च । च क्षयणाय । क्षयणाय च । च नम :। नम :कपर्दिने ।
कपर्दिने च । च पुलस्तये । पुलस्तये च । च नम : । नमो गोष्ठ्याय । गोष्ठ्याय च । गोष्ठ्यायेति
गो = स्थ्याय । च गृह्याय । गृह्याय च । च नम : । नम स्तल्प्याय । तल्प्याय च । च गेह्याय ।
गेह्याय च । च नम : । नम : काट्याय । काट्याय च । च गह्वरेष्ठाय । गह्वरेष्ठाय च । गह्वरेष्ठायेति
गह्वरे = स्थाय । च नम : । नमो ह्रदय्याय । ह्रदय्याय च । च निवेष्प्याय । निवेष्प्याय च ।
निवेष्प्यायेति नि = वेष्प्याय । च नम : । नम : पाꣳसव्याय । पाꣳसव्याय च । च रजस्याय ।
रजस्याय च । च नम :। नम श्शुष्क्याय । शुष्क्याय च । च हरित्याय । हरित्याय च । च नम :।
नमो लोप्याय । लोप्याय च । चोलप्याय । उलप्याय च । च नम : । नम ऊर्व्याय । ऊर्व्याय च ।
च सूर्म्याय । सूर्म्याय च । च नम :। नम : पर्ण्याय । पर्ण्याय च । च पर्णशद्याय । पर्णशद्याय च।

पर्णशद्यायेति पर्ण = शद्याय । च नम : । नमो ऽपगुरमाणायाप । अपगुरमाणाय च । अपगुरमाणायेत्यप = गुरमाणाय । चाभिघ्नते । अभिघ्नते च। अभिघ्नत इत्यभि = घ्नते । च नमः। नम आक्खिदते । आक्खिदते च । आक्खिदत इत्या = खिदते । च प्रक्खिदते । प्रक्खिदते च । प्रक्खिदत इति प्र = खिदते । च नम : । नमो व : । व : किरिकेभ्य : । किरिकेभ्यो देवाना म्। देवानाꣳ हृदयेभ्य : । हृदयेभ्यो नम : । नमो विक्षीणकेभ्य : । विक्षीणकेभ्यो नम : । विक्षीणकेभ्य इति वि = क्षीणकेभ्य : । नमो विचिन्वत्केभ्य : । विचिन्वत्केभ्यो नम : । विचिन्वत्केभ्य इति वि = चिन्वत्केभ्य :। नम आनिर्हतेभ्य :। आनिर्हतेभ्यो नम : । आनिर्हतेभ्य इत्या नि : = हतेभ्य :। नम आमीवत्केभ्य : । आमीवत्केभ्य इत्या = मीवत्केभ्य : ।।९।।

द्रापे - अन्धस : । अन्धस स्पते । पते दरिद्रत् । दरिद्र न्नीललोहित । नीललोहि तेति नील = लोहित ।। एषां पुरुषाणाम् । पुरुषाणा मेषाम् । एषां पशूनाम् । पशूनां मा । मा भे : । भे र्मा ।

माऽऽरः । अरो मो । मो - एषाम् । मो इति मो । एषाङ् किम् । कि ञ्चन । चना ममत् । आमम
दित्यां ममत् ।। या ते । ते रुद्र । रुद्र शिवा । शिवा तनूः। तनू श्शिवा । शिवा विश्वाहभेषजी।
विश्वाहभेषजीति विश्वाह = भेषजी ।। शिवा रुद्रस्य । रुद्रस्य भेषजी । भेषजी तया । तया नः।
नो मृड । मृड जीवसे । जीवस इति जीवसे ।। इमाꣳ रुद्राय । रुद्राय तवसे । तवसे कपर्दिने ।
कपर्दिने क्षयद्वीराय । क्षयद्वीराय प्र । क्षयद्वीरायेति क्षयत् = वीराय । प्र भरामहे। भरामहे मतिम्।
मति मिति मतिम् ।। यथा नः । नश्शम् । शम सत् । असद् द्विपदे । द्विपदे चतुष्पदे । द्विपद
इतिद्वि = पदे । चतुष्पदे विश्व म् । चतुष्पद इति चतुः = पदे । विश्वम् पुष्टम् । पुष्टङ् ग्रामे ।
ग्रामे - अस्मिन्न् । अस्मि न्ननातुरम् । अनातुर मित्यना = तुरम्।। मृडा नः। नो रुद्र । रुद्रो त ।
उत नः । नो मयः । मय स्कृधि । कृधि क्षयद्वीराय । क्षयद्वीराय नमसा । क्षयद्वीरायेति क्षयत् =
वीराय । नमसा विधेम । विधेम ते । त इति ते।। यच्छम् । शञ्च । च योः। योश्च । च मनुः।

मनुरा यजे । आयजे पिता । आयज इत्या = यजे । पिता तत् । तदश्याम । अश्याम तव । तव रुद्र । रुद्र प्रणीतौ। प्रणीता विति प्र = नीतौ।। मा न :। नो महान्त म् । महान्त मुत । उतमा । मा न :। नो - अर्भकम् । अर्भकं मा । मा न : । न उक्षन्तम् । उक्षन्त मुत । उतमा । मा न :। न उक्षितम् । उक्षित मित्यु क्षितम् ।। मा न :। नो वधी :। वधी : पितर म् । पितरं मा । मोत। उत मातर म् । मातरम् प्रिया : । प्रिया मा । मा न :। न स्तनुव : । तनुवो रुद्र । रुद्र रीरिष :। रीरिष इति रीरिष : ।। मा न : । न स्तोके । तोके तनये । तनये मा । मा न : । न आयुषि । आयुषि मा । मा न :। नो गोषु । गोषु मा । मा न :। नो -अश्वेषु । अश्वेषु रीरिषः। रीरिष इति रीरिष : ।। वीरान्मा । मा न : । नो रुद्र । रुद्र भामित : । भामितो वधी :। वधीर् हविष्मन्त :। हविष्मन्तो नमसा । नमसा विधेम । विधेम ते । त इति ते ।। आरात्ते। ते गोघ्ने। गोघ्न उत । गोघ्न इति गो = घ्ने। उत पूरुषघ्ने । पूरुषघ्ने क्षयद्वीराय । पूरुषघ्न इति पूरुष = घ्ने। क्षयद्वीराय

सुम्नम् । क्षयद्वीरायेति क्षयत् = वीराय । सुम्न मस्मे । अस्मे ते । अस्मे इत्यमे । ते - अस्तु । अस्त्वित्यस्तु ।। रक्षा च । च न :। नो - अधि । अधि च । च देव । देव ब्रूहि । ब्रूह्यध। अधा च । च न : । नश्शर्म । शर्म यच्छ । यच्छ द्विबर्हा : । द्विबर्हा इति द्वि = बर्हा :।। स्तुहि श्रुतम्। श्रुतङ् गर्तसदं म् । गर्तसदँ य्युवानम् । गर्तसद मिति गर्त = सदं म् । युवानं मृगम्। मृगन्न । न भीमम् । भीम मुपहत्नुम् । उपहत्नु मुग्रम् । उग्रमित्युग्रम् ।। मृडा जरित्रे। जरित्रे रुद्र। रुद्र स्तवानः। स्तवानो -अन्यम् । अन्यन्ते । ते - अस्मत् । अस्मन्नि । निवपन्तु । वपन्तु सेना : । सेना इति सेना : ।। परिण : । नो रुद्रस्य । रुद्रस्य हेति : । हेति वृंणक्तु । वृणक्तु परि । परि त्वेषस्य । त्वेषस्य दुर्मति : । दुर्मति रघायो : । दुर्मतिरिति दु : = मति : । अघायो रित्यघ = यो : ।। अवस्थिरा । स्थिरा मघवद्भ्य :। मघवद्भ्य स्तनुष्व । मघवद्भ्य इति मघवत् = भ्य :। तनुष्व मीढ्व :। मीढ्व स्तोकाय । तोकाय तनयाय । तनयाय मृडय । मृडयेति मृडय ।। मीढुष्टम शिवतम । मीढुष्ट

मेति मीढु : = तम । शिवतम शिव :। शिवतमेति शिव = तम । शिवो न :। न स्सुमना : । सुमना भव । सुमना इति सु = मना : । भवेति भव ।। परमे वृक्षे । वृक्ष आयुधम् । आयुध न्निधाय । निधाय कृत्तिम् । निधायेति नि = धाय । कृत्तिँ वसान : । वसान आ । आचर । चर पिनाकम् । पिनाकं बिभ्रत् । बिभ्रदा । आगहि । गहीति गहि ।। विकिरिद विलोहित । विकिरिदेति वि = किरिद । विलोहित नम :। विलोहितेति वि = लोहित । नमस्ते । ते -अस्तु । अस्तु भगवः। भगव इति भग = व :।। यास्ते । ते सहस्रम् । सहस्रँ हेतय :। हेतयोऽन्यम् । अन्य मस्मत् । अस्मन्नि । निर्वपन्तु । वपन्तु ता : । ता इति ता : ।। सहस्राणि सहस्रधा । सहस्रधा बाहुवो : । सहस्रधेति सहस्र = धा । बाहुवो स्तव । तव हेतय : । हेतय इति हेतय : ।। तासा मीशान : । ईशानो भगव : । भगव : पराचीना । भगव इति भग = व : । पराचीना मुखा । मुखा कृधि । कृधीति कृधि ।।१०।।

सहस्राणि सहस्रश : । सहस्रशो ये । सहस्रश इति सहस्र = श : । ये रुद्रा : । रुद्रा - अधि । अधि भूम्याम् । भूम्या मिति भूम्याम् ।। तेषाꣳ सहस्रयोजने । सहस्रयोजनेऽव । सहस्रयोजन इति सहस्र = योजने । अव धन्वानि । धन्वानि तन्मसि । तन्मसीति तन्मसि।। अस्मि न्महति । महत्यर्णवे। अर्णवे ऽन्तरिक्षे । अन्तरिक्षे भवा : । भवा - अधि । अधीत्यधि ।। नीलग्रीवा श्शितिकण्ठा : । नीलग्रीवा इति नील = ग्रीवा : । शितिकण्ठा श्शर्वा : । शितिकण्ठा इति शिति = कण्ठा : । शर्वा - अध : । अध : - क्षमाचरा : । क्षमाचरा इति क्षमाचरा : ।। नीलग्रीवाश् शितिकण्ठा :। नीलग्रीवा इति नील = ग्रीवा : । शितिकण्ठा दिवम् । शितिकण्ठा इति शिति = कण्ठा : । दिवꣳ रुद्रा :। रुद्रा - उपश्रिता :। उपश्रिता इत्युप = श्रिता : ।। ये वृक्षेषु । वृक्षेषु सस्पिञ्जरा :। सस्पिञ्जरा नीलग्रीवा : । नीलग्रीवा विलोहिता : । नीलग्रीवा इति नील = ग्रीवा : । विलोहिता इति वि = लोहिता : ।। ये भूतानाम् । भूताना मधिपतय : । अधिपतयो विशिखास : । अधिपतय

इत्यधि = पतय : । विशिखास : कपर्दिन : । विशिखास इति वि = शिखास : । कपर्दिन इति कपर्दिन : ।। ये - अन्नेषु । अन्नेषु विविद्ध्यन्ति । विविद्ध्यन्ति पात्रेषु । विविद्ध्यन्तीति वि = विद्ध्यन्ति । पात्रेषु पिबत :। पिबतो जनान् । जनानिति जनान् ।। ये पथाम् । पथां पथिरक्षय :। पथिरक्षय ऐलबृदा :। पथिरक्षय इति पथि = रक्षय : । ऐलबृदा यव्युध : । यव्युध इति यव्युध :।। ये तीर्थानि । तीर्थानि प्रचरन्ति । प्रचरन्ति सृकावन्त : । प्रचरन्तीति प्र = चरन्ति । सृकावन्तो निषङ्गिण : । सृकावन्त इति सृका = वन्त : । निषङ्गिण इति नि = सङ्गिन : ।। य एतावन्त :। एतावन्तश्च । च भूयाꣳस : । भूयाꣳसश्च । च दिश : । दिशो रुद्रा : । रुद्रा वितस्थिरे । वितस्थिर इति वि = तस्थिरे ।। तेषाꣳ सहस्रयोजने । सहस्रयोजनेऽव । सहस्रयोजन इति सहस्र = योजने । अव धन्वानि । धन्वानि तन्मसि । तन्मसीति तन्मसि ।। नमो रुद्रेभ्य : । रुद्रेभ्यो ये । ये पृथिव्याम् । पृथिव्याँ य्ये । येऽन्तरिक्षे । अन्तरिक्षे ये । ये दिवि । दिवि येषाम् । येषा मन्नम्।

अन्नँ वात : । वातो वर्षम् । वर्ष मिषव : । इषव स्तेभ्य : । तेभ्यो दश । दश प्राची : । प्राची दश । दश दक्षिणा । दक्षिणा दश । दश प्रतीची : । प्रतीची दश । दशोदीची : । उदीची दश । दशोर्ध्वा : । ऊर्ध्वा स्तेभ्य : । तेभ्यो नम : । नमस्ते । ते न : । नो मृडयन्तु । मृडयन्तु ते । ते यम् । यन् द्विष्म :। द्विष्मो य :। यश्च । च न : । नो द्वेष्टि । द्वेष्टि तम् । तँ व : । वो जम्भे । जम्भे दधामि । दधामीति दधामि ।।११।।

त्र्यम्बकँ य्यजामहे । त्र्यम्बक मिति त्रि = अम्बकम् । यजामहे सुगन्धिम् । सुगन्धिम् पुष्टिवर्धनम् । सुगन्धि मिति सु = गन्धिम् । पुष्टिवर्धन मिति पुष्टि = वर्धनम् ।। उर्वारुक मिव । इव बन्धनात् । बन्धना न्मृत्यो :। मृत्यो मुक्षीय । मुक्षीय मा । माऽमृतात् । अमृतादि त्यमृतात् ।। यो रुद्र :। रुद्रो - अग्नौ । अग्नौ य : । यो - अप्सु । अप्सु य : । अप्स्वित्यप् = सु । य ओषधीषु ।

ओषधीषु य : । यो रुद्र : । रुद्रो विश्वा । विश्वा भुवना । भुवना ऽविवेश । आविवेश तस्मै । आविवेशेत्या = विवेश । तस्मै रुद्राय । रुद्राय नम : । नमो - अस्तु । अस्त्वित्यस्तु ।।

# श्री रुद्रम् - घनम्

## गणपति सूक्तम् - घनम्

| | |
|---|---|
| १ | गणानां त्वा त्वा गणानां ङ्गणानां त्वा गणपतिङ्गणपति त्वा गणानां ङ्गणानां त्वा गणपतिम् |
| २ | त्वा गणपतिङ्गणपति न्त्वा त्वा गणपतिँ हवामहे हवामहे गणपति न्त्वा त्वा गणपतिँ हवामहे |
| ३ | गणपतिँ हवामहे हवामहे गणपतिङ्गणपतिँ हवामहे कविङ्कविँ हवामहे गणपतिङ्गणपतिँ हवामहे कविम् |
| ४ | गणपति मिति गण = पतिम् |

| | |
|---|---|
| ५ | हवामहे कविङ् कवि॰ हवामहे हवामहे कविङ् कवीनाङ् कवीनाङ् कवि॰ हवामहे हवामहे<br>कविङ् कवीनाम् |
| ६ | कविङ् कवीनाङ् कवीनाङ् कविङ् कविङ् कवीना मुपमश्रवस्तम मुपमश्रवस्तमङ् कवीनाङ्<br>कविङ् कविङ् कवीना मुपमश्रवस्तमम् |
| ७ | कवीना मुपमश्रवस्तम मुपमश्रवस्तमङ् कवीनाङ् कवीना मुपमश्र वस्तमम् |
| ८ | उपमश्रवस्तम मित्युप मश्रव : = तमम् |
| ९ | ज्येष्ठराजं ब्रह्मणां ब्रह्मणा ञ्ज्येष्ठराज ञ्ज्येष्ठराजं ब्रह्मणां ब्रह्मणो ब्रह्मणो ब्रह्मणां ञ्ज्येष्ठराज<br>ञ्ज्येष्ठराजं ब्रह्मणां ब्रह्मण : |
| १० | ज्येष्ठराजमिति ज्येष्ठ = राज म् |

| | |
|---|---|
| ११ | ब्रह्मणां ब्रह्मणो ब्रह्मणो ब्रह्मणां ब्रह्मणां ब्रह्मणस्पते पते ब्रह्मणो ब्रह्मणां ब्रह्मणां ब्रह्मणस्पते |
| १२ | ब्रह्मणस्पते पते ब्रह्मणो ब्रह्मणस्पत आ पते ब्रह्मणो ब्रह्मणस्पत आ |
| १३ | पत आ पते पत आ नो न आ पते पत आ न : |
| १४ | आ नो न आन श्शृण्व न्छृण्वन्न आन श्शृण्वन्न् |
| १५ | नश्शृण्व न्छृण्वन्नो नश्शृण्व न्नूतिभि रूतिभि श्शृण्वन्नो नश्शृण्व न्नूतिभि : |
| १६ | शृण्व न्नूतिभि रूतिभि श्शृण्व न्छृण्व न्नूतिभिस्सीदसी दोतिभि श्शृण्व न्छृण्व न्नूतिभिस्सीद |
| १७ | ऊतिभिस्सीदसी दोतिभि रूतिभिस्सीद सादनꣳ सादनꣳ सीदोतिभि रूतिभिस्सीद सादनम् |
| १८ | ऊतिभिरित्यूति = भि : |

| | |
|---|---|
| १९ | सीद सादन१९ सादन१९ सीद सीद सादनम् |
| २० | सादन मिति सादनम् |
| २१ | ओम् श्री महा गणपतये नमः |

# नमस्ते रुद्र

| | |
|---|---|
| १ | नमस्ते ते नमो नमस्ते रुद्र रुद्र ते नमो नमस्ते रुद्र |
| २ | ते रुद्र रुद्र ते ते रुद्र मन्यवे मन्यवे रुद्र ते ते रुद्र मन्यवे |
| ३ | रुद्र मन्यवे मन्यवे रुद्र रुद्र मन्यव उतो - उतो मन्यवे रुद्र रुद्र मन्यव उतो |
| ४ | मन्यव उतो - उतो मन्यवे मन्यव उतो ते त उतो मन्यवे मन्यव उतो ते |
| ५ | उतो ते त उतो - उतो त इषव इषवे त उतो - उतो त इषवे |
| ६ | उतो इत्युतो |
| ७ | त इषव इषवे ते त इषवे नमो नम इषवे ते त इषवे नम : |
| ८ | इषवे नमो नम इषव इषवे नम : |

| | |
|---|---|
| ९ | नम इति नमः |
| १० | नमस्ते ते नमो नमस्ते - अस्त्वस्तु ते नमो नमस्ते - अस्तु |
| ११ | ते - अस्त्वस्तु ते ते - अस्तु धन्वने धन्वने - अस्तु ते ते - अस्तु धन्वने |
| १२ | अस्तु धन्वने धन्वने - अस्त्वस्तु धन्वने बाहुभ्याम् बाहुभ्या न्धन्वने - अस्त्वस्तु धन्वने बाहुभ्याम् |
| १३ | धन्वने बाहुभ्याम् बाहुभ्या न्धन्वने धन्वने बाहुभ्या मुतोत बाहुभ्या न्धन्वने धन्वने बाहुभ्या मुत |
| १४ | बाहुभ्या मुतोत बाहुभ्याम् बाहुभ्या मुतते त उत बाहुभ्याम् बाहुभ्या मुतते |
| १५ | बाहुभ्यामिति बाहु = भ्याम् |

| | |
|---|---|
| १६ | उततें त उतोतते नमो नमंस्त उतोतते नमं : |
| १७ | ते नमो नमंस्ते ते नमं : |
| १८ | नम इति नमं : |
| १९ | यातें ते या या त इषुरिषुंस्ते या या त इषुं : |
| २० | त इषुरिषुंस्ते त इषुं श्शिवतंमा शिवत मेषुंस्ते त इषुं श्शिवतंमा |
| २१ | इषुं श्शिवतंमा शिवत मेषु रिषुं श्शिवतंमा शिवं॑ शिवं॑ शिवत मेषु रिषुं श्शिवतंमा शिवम् |
| २२ | शिवतंमा शिवं॑ शिवं॑ शिवतंमा शिवतंमा शिवं बभूवं बभूवं शिवं॑ शिवतंमा शिवतंमा शिवं बभूवं |
| २३ | शिवत मेतिं शिव = तमा |

| | |
|---|---|
| २४ | शिवं बभूव बभूव शिवꣳ शिवं बभूव ते ते बभूव शिवꣳ शिवं बभूव ते |
| २५ | बभूव ते ते बभूव बभूव ते धनु र्धनुस्ते बभूव बभूव ते धनु : |
| २६ | ते धनु र्धनुस्ते ते धनु : |
| २७ | धनुरिति धनु : |
| २८ | शिवा शरव्या शरव्या शिवा शिवा शरव्या या या शरव्या शिवा शिवा शरव्या या |
| २९ | शरव्या या या शरव्या शरव्या या तव तव या शरव्या शरव्या या तव |
| ३० | या तव तव या या तव तया तया तव या या तव तया |
| ३१ | तव तया तया तव तव तया नो नस्तया तव तव तया न : |
| ३२ | तया नो नस्तया तया नो रुद्र रुद्र नस्तया तया नो रुद्र |

| | |
|---|---|
| ३३ | नो रुद्र रुद्र नो नो रुद्र मृडय मृडय रुद्र नो नो रुद्र मृडय |
| ३४ | रुद्र मृडय मृडय रुद्र रुद्र मृडय |
| ३५ | मृडयेति मृडय |
| ३६ | या ते ते या या ते रुद्र रुद्र ते या या ते रुद्र |
| ३७ | ते रुद्र रुद्र ते ते रुद्र शिवा शिवा रुद्र ते ते रुद्र शिवा |
| ३८ | रुद्र शिवा शिवा रुद्र रुद्र शिवा तनू स्तनू श्शिवा रुद्र रुद्र शिवा तनू : |
| ३९ | शिवा तनू स्तनू श्शिवा शिवा तनूर घोरा ऽघोरा तनू श्शिवा शिवा तनूर घोरा |
| ४० | तनूर घोरा ऽघोरा तनू स्तनूर घोरा ऽपापकाशिन्य पापकाशिन्य घोरा तनू स्तनूर घोरा ऽपापकाशिनी |

| | |
|---|---|
| ४१ | अघोरा ऽपापकाशिन्य पापकाशिन्य घोरा ऽघोरा ऽपापकाशिनी |
| ४२ | अपापकाशिनीत्य पाप = काशिनी |
| ४३ | तया नो नस्तया तया नस्तनुवा तनुवा नस्तया तया नस्तनुवा |
| ४४ | नस्तनुवा तनुवा नो नस्तनुवा शन्तमया शन्तमया तनुवा नो नस्तनुवा शन्तमया |
| ४५ | तनुवा शन्तमया शन्तमया तनुवा तनुवा शन्तमया गिरिशन्त गिरिशन्त शन्तमया तनुवा<br>तनुवा शन्तमया गिरिशन्त |
| ४६ | शन्तमया गिरिशन्त गिरिशन्त शन्तमया शन्तमया गिरिशन्ता भ्यभि गिरिशन्त शन्तमया<br>शन्तमया गिरिशन्ताभि |
| ४७ | शन्तमयेति शम् = तमया |

| | |
|---|---|
| ४८ | गिरिशन्ता भ्य्भि गिरिशन्त गिरिशन्ताभि चाकशीहि चाकशीह्यभि गिरिशन्त गिरिशन्ताभि चाकशीहि |
| ४९ | गिरिशन्तेति गिरि = शन्त |
| ५० | अभि चाकशीहि चाकशी ह्यभ्यभि चाकशीहि |
| ५१ | चाकशीहीति चाकशीहि |
| ५२ | या मिषु मिषुँ य्याँ य्या मिषुङ् गिरिशन्त गिरिशन्तेषुँ य्याँ य्या मिषुङ् गिरिशन्त |
| ५३ | इषुङ् गिरिशन्त गिरिशन्तेषु मिषुङ् गिरिशन्त हस्ते हस्ते गिरिशन्तेषु मिषुङ् गिरिशन्त हस्ते |
| ५४ | गिरिशन्त हस्ते हस्ते गिरिशन्त गिरिशन्त हस्ते बिभर्षि बिभर्षि हस्ते गिरिशन्त गिरिशन्त हस्ते बिभर्षि |

| | |
|---|---|
| ५५ | गिरिशन्तेति गिरि = शन्त |
| ५६ | हस्ते बिभर्षि बिभर्षि हस्ते हस्ते बिभर्ष्यस्तवे - अस्तवे बिभर्षि हस्ते हस्ते बिभर्ष्यस्तवे |
| ५७ | बिभर्ष्यस्तवे - अस्तवे बिभर्षि बिभर्ष्यस्तवे |
| ५८ | अस्तव इत्यस्तवे |
| ५९ | शिवाङ् गिरित्र गिरित्र शिवाꣳ शिवाङ् गिरित्र तान्ताङ् गिरित्र शिवाꣳ शिवाङ् गिरित्र ताम् |
| ६० | गिरित्र तान्ताङ् गिरित्र गिरित्र ताङ् कुरु कुरु ताङ् गिरित्र गिरित्र ताङ् कुरु |
| ६१ | गिरित्रेति गिरि = त्र |
| ६२ | ताङ् कुरु कुरु तान्ताङ् कुरु मा मा कुरु तान्ताङ् कुरु मा |
| ६३ | कुरु मा मा कुरु कुरु मा हिꣳसीर्हिꣳसी मर्रा कुरु कुरु मा हिꣳसी : |

| | |
|---|---|
| ६४ | मा हिꣳसीर्हिꣳसी र्मा मा हिꣳसी : पुरुषं पुरुषꣳ हिꣳसी र्मा मा हिꣳसी : पुरुषम् |
| ६५ | हिꣳसी : पुरुषं पुरुषꣳ हिꣳसीर्हिꣳसी : पुरुष ज्जग ज्जग त्पुरुषꣳ हिꣳसी र्हिꣳसी : पुरुष ज्जगत् |
| ६६ | पुरुष ज्जग ज्जग त्पुरुषं पुरुष ज्जगत् |
| ६७ | जगदिति जगत् |
| ६८ | शिवेन वचसा वचसा शिवेन शिवेन वचसा त्वा त्वा वचसा शिवेन शिवेन वचसात्वा |
| ६९ | वचसात्वा त्वा वचसा वचसात्वा गिरिश गिरिशत्वा वचसा वचसात्वा गिरिश |
| ७० | त्वा गिरिश गिरिशत्वा त्वा गिरिशाच्छाच्छ गिरिशत्वा त्वा गिरिशाच्छ |
| ७१ | गिरिशाच्छाच्छ गिरिश गिरिशाच्छा वदामसि वदामस्यच्छ गिरिश गिरिशाच्छा वदामसि |

| | |
|---|---|
| ७२ | अच्छा वदामसि वदामस्यच्छाच्छा वदामसि |
| ७३ | वदामसीति वदामसि |
| ७४ | यथा नो नो यथा यथा नस्सर्वꣳ सर्वन्नो यथा यथा नस्सर्व म् |
| ७५ | नस्सर्वꣳ सर्वन्नो नस्सर्व मिदि थ्सर्वन्नो नस्सर्व मित् |
| ७६ | सर्व मिदि थ्सर्वꣳ सर्व मिज्जग ज्जगदि थ्सर्वꣳ सर्व मिज्जगत् |
| ७७ | इज्ञग ज्जगदिदि ज्जगद यक्ष्मम यक्ष्मञ्जग दिदि ज्जगद यक्ष्मम् |
| ७८ | जगद यक्ष्मम यक्ष्मञ्जग ज्जगद यक्ष्मꣳ सुमना स्सुमना - अयक्ष्मञ्जग ज्जगद यक्ष्मꣳ सुमना : |

| | |
|---|---|
| ७९ | अयक्ष्मꣳ सुमना स्सुमना - अयक्ष्मम यक्ष्मꣳ सुमना - असदस थ्सुमना - अयक्ष्मम यक्ष्मꣳ सुमना - असत् |
| ८० | सुमना - असदस थ्सुमना स्सुमना - असत् |
| ८१ | सुमना इति सु = मना : |
| ८२ | असदित्यसत् |
| ८३ | अध्य वोच दवोच दध्यध्य वोच दधिवक्ता ऽधिवक्ता वोच दध्यध्य वोच दधिवक्ता |
| ८४ | अवोच दधिवक्ता ऽधिवक्ता वोचद वोच दधिवक्ता प्रथम : प्रथमो - अधिवक्ता वोच दवोच दधिवक्ता प्रथम : |

| | |
|---|---|
| ८५ | अधिवक्ता प्रथम : प्रथमो - अधिवक्ता ऽधिवक्ता प्रथमो दैव्यो दैव्य : प्रथमो - अधिवक्ता ऽधिवक्ता प्रथमो दैव्य : |
| ८६ | अधिवक्तेत्यधि = वक्ता |
| ८७ | प्रथमो दैव्यो दैव्य : प्रथम : प्रथमो दैव्यो भिषग् भिषग् दैव्य : प्रथम : प्रथमो दैव्यो भिषक् |
| ८८ | दैव्यो भिषग् भिषग् दैव्या दैव्यो भिषक् |
| ८९ | भिषगिति भिषक् |
| ९० | अहीँश्च चाही नहीँश्च सर्वा न्त्सर्वाँ चाही नहीँश्च सर्वान् |
| ९१ | च सर्वा न्त्सर्वाँश्च च सर्वा ञ्जम्भय न्जम्भय न्त्सर्वाँश्च च सर्वा ञ्जम्भयन्न् |

| | |
|---|---|
| ९२ | सर्वा ञ्जम्भय न्जम्भय न्थ्सर्वा न्थ्सर्वा ञ्जम्भय न्थ्सर्वा स्सर्वा जम्भय न्थ्सर्वा न्थ्सर्वा ञ्जम्भय न्थ्सर्वा : |
| ९३ | जम्भय न्थ्सर्वा स्सर्वा जम्भय ञ्जम्भय न्थ्सर्वा श्च च सर्वा जम्भय ञ्जम्भय न्थ्सर्वा श्च |
| ९४ | सर्वा श्च च सर्वा स्सर्वा श्च यातुधान्यो यातुधान्यश्च सर्वा स्सर्वा श्च यातुधान्य : |
| ९५ | च यातुधान्यो यातुधान्यश्च च यातुधान्य : |
| ९६ | यातुधान्य इति यातु = धान्य : |
| ९७ | असौ यो यो - असा वसौ यस्ताम्र स्ताम्रो यो - असा वसौ यस्ताम्र : |
| ९८ | यस्ताम्र स्ताम्रो यो यस्ताम्रो - अरुणो - अरुणस्ताम्रो यो यस्ताम्रो - अरुण : |
| ९९ | ताम्रो - अरुणो - अरुणस्ताम्र स्ताम्रो - अरुण उतोता रुणस्ताम्र स्ताम्रो - अरुण उत |

| | |
|---|---|
| १०० | अरुण - उतोता रुणो - अरुण उत बभ्रु र्बभ्रु रुता रुणो - अरुण उत बभ्रु : |
| १०१ | उत बभ्रु र्बभ्रु रुतोत बभ्रु स्सुमङ्गल स्सुमङ्गलो बभ्रु रुतोत बभ्रु स्सुमङ्गल : |
| १०२ | बभ्रु स्सुमङ्गल स्सुमङ्गलो बभ्रु र्बभ्रु स्सुमङ्गल : |
| १०३ | सुमङ्गल इति सु = मङ्गल : |
| १०४ | ये च च ये ये चेमा मिमाञ्च ये ये चेमाम् |
| १०५ | चेमा मिमाञ्च चेमाँ रुद्रा रुद्रा - इमाञ्च चेमाँ रुद्रा : |
| १०६ | इमाँ रुद्रा रुद्रा - इमा मिमाँ रुद्रा - अभितो - अभितो रुद्रा - इमा मिमाँ रुद्रा - अभित : |
| १०७ | रुद्रा - अभितो - अभितो रुद्रा रुद्रा - अभितो दिक्षु दिक्ष्वभितो रुद्रा रुद्रा - अभितो दिक्षु |

| | |
|---|---|
| १०८ | अभितो दिक्षु दिक्ष्वभितो -अभितो दिक्षु श्रिता श्श्रिता दिक्ष्वभितो - अभितो दिक्षु श्रिताः |
| १०९ | दिक्षु श्रिता श्श्रिता दिक्षु दिक्षु श्रिता स्सहस्रश स्सहस्रश श्श्रिता दिक्षु दिक्षु श्रिता स्सहस्रशः |
| ११० | श्रिता स्सहस्रश स्सहस्रश श्श्रिता श्श्रिता स्सहस्रशोऽवाव सहस्रश श्श्रिता श्श्रिता स्सहस्रशोऽव |
| १११ | सहस्रशोऽवाव सहस्र स्सहस्रशो ऽवैषामेषा मव सहस्र स्सहस्रशो ऽवैषाम् |
| ११२ | सहस्रश इति सहस्र = श : |
| ११३ | अवैषामेषा मवा वैषाꣳ हेडो हेड एषा म वा वैषाꣳ हेड : |
| ११४ | एषाꣳ हेडो हेड एषा मेषाꣳ हेड ईमह ईमहे हेड एषा मेषाꣳ हेड ईमहे |
| ११५ | हेड ईमह ईमहे हेडो हेड ईमहे |
| ११६ | ईमह इती महे |

| | |
|---|---|
| ११७ | असौयो यो - असा वसौ योऽवसर्पत्यव सर्पतियो - असा वसौ योऽवसर्पति |
| ११८ | योऽवसर्पत्यव सर्पति या योऽवसर्पति नीलग्रीवो नीलग्रीवो ऽवसर्पति या योऽवसर्पति नीलग्रीव : |
| ११९ | अवसर्पति नीलग्रीवो नीलग्रीवो ऽवसर्पत्यव सर्पति नीलग्रीवो विलोहितो विलोहितो नीलग्रीवो ऽवसर्पत्यव सर्पति नीलग्रीवो विलोहित : |
| १२० | अवसर्पतीत्यव = सर्पति |
| १२१ | नीलग्रीवो विलोहितो विलोहितो नीलग्रीवो नीलग्रीवो विलोहित : |
| १२२ | नीलग्रीव इति नील = ग्रीव : |
| १२३ | विलोहित इति वि = लोहित : |

| | |
|---|---|
| १२४ | उतैनमेन मुतोतैनङ् गोपा गोपा - एंन मुतोतैनङ् गोपा : |
| १२५ | एनङ् गोपा गोपा - एंनमेनङ् गोपा - अंदृशन्नदृशन् गोपा - एंनमेनङ् गोपा - अंदृशन्न् |
| १२६ | गोपा - अंदृशन्नदृशन् गोपा गोपा - अंदृशन्नदृश न्नदृशन्नदृशन् गोपा गोपा - अंदृशन्नदृशन्न् |
| १२७ | गोपा इतिं गो = पा : |
| १२८ | अदृशन्नदृशन्नदृशन्नदृशन्नदृशन्नदृश न्नुदहार्य उदहार्यो - अदृशन्नदृश न्नदृशन्नदृश न्नुदहार्यः |
| १२९ | अदृश न्नुदहार्य उदहार्यो - अदृशन्नदृश न्नुदहार्य : |
| १३० | उदहार्य इत्युद = हार्य : |
| १३१ | उतैनमेन मुतोतैनँ विश्वा विश्वैन मुतोतैनँ विश्वा ॥ |
| १३२ | एनँ विश्वा विश्वैन मेनँ विश्वा भूतानि भूतानि विश्वैन मेनँ विश्वा भूतानि |

| | |
|---|---|
| १३३ | विश्वा भूतानि भूतानि विश्वा विश्वा भूतानि स स भूतानि विश्वा विश्वा भूतानि सः |
| १३४ | भूतानि स स भूतानि भूतानि स दृष्टो दृष्टस्स भूतानि भूतानि स दृष्ट : |
| १३५ | स दृष्टो दृष्टस्स स दृष्टो मृडयाति मृडयाति दृष्टस्स स दृष्टो मृडयाति |
| १३६ | दृष्टो मृडयाति मृडयाति दृष्टो दृष्टो मृडयाति नो नो मृडयाति दृष्टो दृष्टो मृडयाति न : |
| १३७ | मृडयाति नो नो मृडयाति मृडयाति न : |
| १३८ | न इति न : |
| १३९ | नमो - अस्त्वस्तु नमो नमो - अस्तु नीलग्रीवाय नीलग्रीवायास्तु नमो नमो - अस्तु नीलग्रीवाय |
| १४० | अस्तु नीलग्रीवाय नीलग्रीवायास्त्वस्तु नीलग्रीवाय सहस्राक्षाय सहस्राक्षाय नीलग्रीवायास्त्वस्तु नीलग्रीवाय सहस्राक्षाय |

| | |
|---|---|
| १४१ | नीलग्रीवाय सहस्राक्षाय सहस्राक्षाय नीलग्रीवाय नीलग्रीवाय सहस्राक्षाय मीढुषे मीढुषे सहस्राक्षाय नीलग्रीवाय नीलग्रीवाय सहस्राक्षाय मीढुषे |
| १४२ | नीलग्रीवायेति नील = ग्रीवाय |
| १४३ | सहस्राक्षाय मीढुषे मीढुषे सहस्राक्षाय सहस्राक्षाय मीढुषे |
| १४४ | सहस्राक्षायेति सहस्र = अक्षाय |
| १४५ | मीढुष इति मीढुषे |
| १४६ | अथो ये येऽथो - अथो ये - अस्यास्य येऽथो - अथो ये - अस्य |
| १४७ | अथो इत्यथो |
| १४८ | ये - अस्यास्य ये ये - अस्य सत्वान स्सत्वानो - अस्य ये ये - अस्य सत्वान : |

| | |
|---|---|
| १४९ | अस्य सत्वान स्सत्वानो - अस्यास्य सत्वानोऽह महॕ सत्वानो - अस्यास्य सत्वानोऽहम् |
| १५० | सत्वानोऽह महॕ सत्वान स्सत्वानोऽह न्तेभ्य स्तेभ्योऽहॕ सत्वान स्सत्वानोऽह न्तेभ्यः |
| १५१ | अह न्तेभ्य स्तेभ्योऽह मह न्तेभ्यो ऽकरमकर न्तेभ्योऽह मह न्तेभ्यो ऽकरम् |
| १५२ | तेभ्यो ऽकरमकर न्तेभ्य स्तेभ्यो ऽकर न्नमो नमो ऽकर न्तेभ्य स्तेभ्यो ऽकर न्नमः |
| १५३ | अकर न्नमो नमो ऽकरमकर न्नमः |
| १५४ | नम इति नमः |
| १५५ | प्र मुञ्च मुञ्च प्र प्र मुञ्च धन्वनो धन्वनो मुञ्च प्र प्र मुञ्च धन्वनः |
| १५६ | मुञ्च धन्वनो धन्वनो मुञ्च मुञ्च धन्वन स्त्व न्त्व न्धन्वनो मुञ्च मुञ्च धन्वनस्त्वम् |
| १५७ | धन्वनस्त्व न्त्व न्धन्वनो धन्वनस्त्व मुभयो रुभयोस्त्व न्धन्वनो धन्वनस्त्व मुभयोः |

| | |
|---|---|
| १५८ | त्व मुभयो रुभयोस्त्व न्त्व मुभयो रार्त्नियो रार्त्नियो रुभयोस्त्व न्त्व मुभयो रार्त्नियो : |
| १५९ | उभयो रार्त्नियो रार्त्नियो रुभयो रुभयो रार्त्नियो ज्यार्ं ज्ज्या मार्त्नियो रुभयो रुभयो रार्त्नियो ज्यार्म् |
| १६० | आर्त्नियो ज्यार्ं ज्ज्या मार्त्नियो रार्त्नियो ज्यार्म् |
| १६१ | ज्यामिति ज्याम् |
| १६२ | याश्च च या याश्च ते ते च या याश्च ते |
| १६३ | च ते ते च च ते हस्ते हस्ते ते च च ते हस्ते |
| १६४ | ते हस्ते हस्ते ते ते हस्त इषव इषवो हस्ते ते ते हस्त इषव : |
| १६५ | हस्त इषव इषवो हस्ते हस्त इषव : परा परेषवो हस्ते हस्त इषव : परा |

| | |
|---|---|
| १६६ | इषव : परा परेषव इषव : परा तास्ता : परेषव इषव : परा ता : |
| १६७ | परा तास्ता : परा परा ता भगवो भगवस्ता : परा परा ता भगव : |
| १६८ | ता भगवो भगवस्तास्ता भगवो वप वप भगवस्तास्ता भगवो वप |
| १६९ | भगवो वप वप भगवो भगवो वप |
| १७० | भगव इति भग = व : |
| १७१ | वपेति वप |
| १७२ | अवतत्य धनु र्धनुरवतत्या वतत्य धनुस्त्व न्त्व न्धनुरवतत्या वतत्य धनुस्त्वम् |
| १७३ | अवतत्येत्यव = तत्य |
| १७४ | धनुस्त्व न्त्व न्धनु र्धनुस्त्वꣳ सहस्राक्ष सहस्राक्षत्व न्धनु र्धनुस्त्वꣳ सहस्राक्ष |

| | |
|---|---|
| १७५ | त्वꣳ सहस्राक्ष सहस्राक्षत्व न्त्वꣳ सहस्राक्ष शतेषुधे शतेषुधे सहस्राक्षत्व न्त्वꣳ सहस्राक्ष शतेषुधे |
| १७६ | सहस्राक्ष शतेषुधे शतेषुधे सहस्राक्ष सहस्राक्ष शतेषुधे |
| १७७ | सहस्राक्षेति सहस्र = अक्ष |
| १७८ | शतेषुध इति शत = इषुधे |
| १७९ | निशीर्य शल्यानाꣳ शल्याना न्निशीर्य निशीर्य शल्यानां मुखा मुखा शल्याना न्निशीर्य निशीर्य शल्यानां मुखा |
| १८० | निशीर्येति नि = शीर्य |
| १८१ | शल्यानां मुखा मुखा शल्यानाꣳ शल्यानां मुखा शिव श्शिवो मुखा शल्यानाꣳ शल्यानां मुखा शिव : |

| | |
|---|---|
| १८२ | मुखा शिव श्शिवो मुखा मुखा शिवो नो न श्शिवो मुखा मुखा शिवो न : |
| १८३ | शिवो नो न श्शिव श्शिवो न स्सुमना स्सुमना न श्शिव श्शिवो न स्सुमना : |
| १८४ | न स्सुमना स्सुमना नो न स्सुमना भव भव सुमना नो न स्सुमना भव |
| १८५ | सुमना भव भव सुमना स्सुमना भव |
| १८६ | सुमना इति सु = मना : |
| १८७ | भवेति भव |
| १८८ | विज्य न्धनु र्धनु र्विज्यँ विज्य न्धनु : कपर्दिन : कपर्दिनो धनु र्विज्यँ विज्य न्धनु : कपर्दिन : |
| १८९ | विज्य मिति वि = ज्यम् |

| | |
|---|---|
| १९० | धनु : कपर्दिने : कपर्दिनो धनु र्धनु : कपर्दिनो विशल्यो विशल्य : कपर्दिनो धनु र्धनु : कपर्दिनो विशल्य : |
| १९१ | कपर्दिनो विशल्यो विशल्य : कपर्दिने : कपर्दिनो विशल्यो बाणवान् बाणवान् - विशल्यः कपर्दिने : कपर्दिनो विशल्यो बाणवान् |
| १९२ | विशल्यो बाणवान् बाणवान् - विशल्यो विशल्यो बाणवाँ उतोत बाणवान् - विशल्यो विशल्यो बाणवाँ उत |
| १९३ | विशल्य इति वि = शल्य : |
| १९४ | बाणवाँ उतोत बाणवान् बाणवाँ उत |
| १९५ | बाणवानिति बाण = वान् |

| | |
|---|---|
| १९६ | उतेत्युत |
| १९७ | अनेशन्नस्यास्या नेशन्न नेश न्नस्येषव इषवो - अस्या नेशन्न नेश न्नस्येषव : |
| १९८ | अस्येषव इषवो - अस्यास्येषव आभु राभु रिषवो - अस्यास्येषव आभु : |
| १९९ | इषव आभु राभु रिषव इषव आभु रस्यास्याभु रिषव इषव आभु रस्य |
| २०० | आभु रस्यास्याभु राभु रस्य निषङ्गथि र्निषङ्गथि रस्याभु राभु रस्य निषङ्गथि : |
| २०१ | अस्य निषङ्गथि र्निषङ्गथि रस्यास्य निषङ्गथि : |
| २०२ | निषङ्गथि रिति निषङ्गथि : |
| २०३ | या ते ते या या ते हेतिर् हेतिस्ते या या ते हेति : |
| २०४ | ते हेतिर् हेतिस्ते ते हेति मीढुष्टम मीढुष्टम हेतिस्ते ते हेति मीढुष्टम |

| | |
|---|---|
| २०५ | हेति मीढुष्टम मीढुष्टम हेतिर् हेति मीढुष्टम हस्ते हस्ते मीढुष्टम हेतिर् हेति मीढुष्टम हस्ते |
| २०६ | मीढुष्टम हस्ते हस्ते मीढुष्टम मीढुष्टम हस्ते बभूव बभूव हस्ते मीढुष्टम मीढुष्टम हस्ते बभूव |
| २०७ | मीढुष्टमेति मीढु : = तम |
| २०८ | हस्ते बभूव बभूव हस्ते हस्ते बभूव ते ते बभूव हस्ते हस्ते बभूव ते |
| २०९ | बभूव ते ते बभूव बभूव ते धनु र्धनुस्ते बभूव बभूव ते धनु : |
| २१० | ते धनु र्धनुस्ते ते धनु : |
| २११ | धनु रिति धनु : |
| २१२ | तयाऽस्मा नस्मा न्तया तयाऽस्मान् - विश्वतो विश्वतो - अस्मा न्तया तयाऽस्मान् - विश्वत : |

| | |
|---|---|
| २१३ | अस्मान् - विश्वतो विश्वतो - अस्मा नस्मान् - विश्व तस्त्व न्त्वँ विश्वतो - अस्मा नस्मान् - विश्व तस्त्वम् |
| २१४ | विश्व तस्त्व न्त्वँ विश्वतो विश्व तस्त्वम यक्ष्मया ऽयक्ष्मयात्वँ विश्वतो विश्व तस्त्वम यक्ष्मया |
| २१५ | त्वम यक्ष्मया ऽयक्ष्मयात्व न्त्वम यक्ष्मया परि पर्ययक्ष्म यात्व न्त्वम यक्ष्मया परि |
| २१६ | अयक्ष्मया परि पर्य यक्ष्मया ऽयक्ष्मया परिब्भुज भुज पर्य यक्ष्मया ऽयक्ष्मया परिब्भुज |
| २१७ | परिब्भुज भुज परि परिब्भुज |
| २१८ | भुजेति भुज |
| २१९ | नमस्ते ते नमो नमस्ते - अस्त्वस्तु ते नमो नमस्ते - अस्तु |

| | |
|---|---|
| २२० | ते - अस्त्वस्तु ते ते - अस्त्वायु धाया युधायास्तु ते ते - अस्त्वायुधाय |
| २२१ | अस्त्वायु धाया युधाया स्त्वस्त्वायु धाया नाततताया नाततताया युधाया स्त्वस्त्वायु धाया नाततताय |
| २२२ | अयुधाया नाततताया नाततताया युधाया युधाया नाततताय धृष्णवे धृष्णवे ऽनाततताया युधाया युधाया नाततताय धृष्णवे |
| २२३ | अनाततताय धृष्णवे धृष्णवे ऽनाततताया नाततताय धृष्णवे |
| २२४ | अनाततायेत्यना = तताय |
| २२५ | धृष्णव इति धृष्णवे |
| २२६ | उभाभ्यां मुतोतो भाभ्यां मुभाभ्यां मुतते त उतो भाभ्यां मुभाभ्यां मुतते |

| | |
|---|---|
| २२७ | उततें त उतोतते नमो नमस्त उतो तते नम : |
| २२८ | ते नमो नमस्ते ते नमो बाहुभ्याम् बाहुभ्या न्नमस्ते ते नमो बाहुभ्याम् |
| २२९ | नमो बाहुभ्याम् बाहुभ्या न्नमो नमो बाहुभ्या न्तव तव बाहुभ्या न्नमो नमो बाहुभ्या न्तव |
| २३० | बाहुभ्या न्तव तव बाहुभ्याम् बाहुभ्या न्तव धन्वने धन्वने तव बाहुभ्याम् बाहुभ्या न्तव धन्वने |
| २३१ | बाहुभ्यामिति बाहु = भ्याम् |
| २३२ | तव धन्वने धन्वने तव तव धन्वने |
| २३३ | धन्वन इति धन्वने |
| २३४ | परिते ते परि परि ते धन्वनो धन्वनस्ते परि परि ते धन्वन : |

| | |
|---|---|
| २३५ | ते धन्वनो धन्वनस्ते ते धन्वनो हेतिर् हेति र्धन्वनस्ते ते धन्वनो हेति : |
| २३६ | धन्वनो हेतिर् हेति र्धन्वनो धन्वनो हेतिरस्मा नस्मान् - हेति र्धन्वनो धन्वनो हेतिरस्मान् |
| २३७ | हेतिरस्मा नस्मान् - हेतिर् हेति रस्मा न्वृणक्तु वृणक्त्वस्मान् - हेतिर् हेति रस्मा न्वृणक्तु |
| २३८ | अस्मा न्वृणक्तु वृणक्त्वस्मा नस्मा न्वृणक्तु विश्वतो विश्वतो वृणक्त्वस्मा नस्मान् न्वृणक्तु विश्वत : |
| २३९ | वृणक्तु विश्वतो विश्वतो वृणक्तु वृणक्तु विश्वत : |
| २४० | विश्वत इति विश्वत : |
| २४१ | अथो यो योऽथो - अथो य इषुधिरि षुधि र्योऽथो - अथो य इषुधि : |
| २४२ | अथो इत्यथो |

| | |
|---|---|
| २४३ | य इषुधिरि षुधि र्यो य इषुधि स्तव तवे षुधि र्यो य इषुधिस्तव |
| २४४ | इषुधिस्तव तवेषु धिरिषु धिस्त वार आरे तवेषु धिरिषु धिस्त वारे |
| २४५ | इषुधिरितीषु = धि : |
| २४६ | त वार आरे तव तवारे - अस्म दस्म दारे तव त वारे - अस्मत् |
| २४७ | आरे - अस्म दस्म दार आरे - अस्मन्निन्यस्म दार आरे - अस्मन्नि |
| २४८ | अस्मन्निन्यस्म दस्मन्निर्धेहिधे हिन्यस्म दस्मन्निर्धेहि |
| २४९ | निर्धेहिधेहि नि नि धेहि तन्त न्धेहि नि नि धेहि तम् |
| २५० | धेहि तन्त न्धेहि धेहि तम् |
| २५१ | तमिति तम् |

# नमो हिरण्यबाहवे

| | |
|---|---|
| १ | नमो हिरण्यबाहवे हिरण्यबाहवे नमो नमो हिरण्यबाहवे सेनान्ये सेनान्ये हिरण्यबाहवे नमो नमो हिरण्यबाहवे सेनान्ये |
| २ | हिरण्यबाहवे सेनान्ये सेनान्ये हिरण्यबाहवे हिरण्यबाहवे सेनान्ये दिशा न्दिशाꣳ सेनान्ये हिरण्यबाहवे हिरण्यबाहवे सेनान्ये दिशाम् |
| ३ | हिरण्यबाहव इति हिरण्य = बाहवे |
| ४ | सेनान्ये दिशा न्दिशाꣳ सेनान्ये सेनान्ये दिशाञ्च च दिशाꣳ सेनान्ये सेनान्ये दिशाञ्च |
| ५ | सेनान्य इति सेना = न्ये |
| ६ | दिशाञ्च च दिशा न्दिशाञ्च पतये पतये च दिशा न्दिशाञ्च पतये |

| | |
|---|---|
| ७ | च पतये पतये च च पतये नमो नमस्पतये च च पतये नमः |
| ८ | पतये नमो नमस्पतये पतये नमो नमः |
| ९ | नमो नमः |
| १० | नमो वृक्षेभ्यो वृक्षेभ्यो नमो नमो वृक्षेभ्यो हरिकेशेभ्यो हरिकेशेभ्यो वृक्षेभ्यो नमो नमो वृक्षेभ्यो हरिकेशेभ्यः |
| ११ | वृक्षेभ्यो हरिकेशेभ्यो हरिकेशेभ्यो वृक्षेभ्यो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पशूनाᳫ हरिकेशेभ्यो वृक्षेभ्यो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम् |
| १२ | हरिकेशेभ्यः पशूनां पशूनाᳫ हरिकेशेभ्यो हरिकेशेभ्यः पशूनां पतये पतये पशूनाᳫ हरिकेशेभ्यो हरिकेशेभ्यः पशूनां पतये |
| १३ | हरिकेशेभ्य इति हरि = केशेभ्यः |

| | |
|---|---|
| १४ | पशूनां पतये पतये पशूनां पशूनां पतये नमो नमस्पतये पशूनां पशूनां पतये नम : |
| १५ | पतये नमो नमस्पतये पतये नमो नम : |
| १६ | नमो नम : |
| १७ | नम स्ससस्पिञ्जराय सस्पिञ्जराय नमो नम स्ससस्पिञ्जराय त्विषीमते त्विषीमते सस्पिञ्जराय नमो नम स्ससस्पिञ्जराय त्विषीमते |
| १८ | सस्पिञ्जराय त्विषीमते त्विषीमते सस्पिञ्जराय सस्पिञ्जराय त्विषीमते पथीनां पथीना न्त्विषीमते सस्पिञ्जराय सस्पिञ्जराय त्विषीमते पथीनाम् |
| १९ | त्विषीमते पथीनां पथीना न्त्विषीमते त्विषीमते पथीनां पतये पतये पथीना न्त्विषीमते त्विषीमते पथीनां पतये |

| | |
|---|---|
| २० | त्विषींमत इति त्विषिं = मते |
| २१ | पथीनां पतये पतये पथीनां पथीनां पतये नमो नमस्पतये पथीनां पथीनां पतये नमः |
| २२ | पतये नमो नमस्पतये पतये नमो नमः |
| २३ | नमो नमः |
| २४ | नमो बभ्लुशाय बभ्लुशाय नमो नमो बभ्लुशाय विव्याधिने विव्याधिने बभ्लुशाय नमो नमो बभ्लुशाय विव्याधिने |
| २५ | बभ्लुशाय विव्याधिने विव्याधिने बभ्लुशाय बभ्लुशाय विव्याधिने ऽन्नाना मन्नानाँ विव्याधिने बभ्लुशाय बभ्लुशाय विव्याधिनेऽन्नानाम् |

| | |
|---|---|
| २६ | विव्याधिने ऽन्नाना मन्नानाँ विव्याधिने विव्याधिने ऽन्नानां पतये पतयेऽन्नानाँ विव्याधिने विव्याधिने ऽन्नानां पतये |
| २७ | विव्याधिन इति वि = व्याधिने |
| २८ | अन्नानां पतये पतयेऽन्नाना मन्नानां पतये नमो नमस्पतयेऽन्नाना मन्नानां पतये नमः |
| २९ | पतये नमो नमस्पतये पतये नमो नमः |
| ३० | नमो नमः |
| ३१ | नमो हरिकेशाय हरिकेशाय नमो नमो हरिकेशायोप वीतिने उपवीतिने हरिकेशाय नमो नमो हरिकेशायोप वीतिने |

| | |
|---|---|
| ३२ | हरिकेशायोप वीतिन उपवीतिने हरिकेशाय हरिकेशायोप वीतिने पुष्टाना म् पुष्टाना मुपवीतिने हरिकेशाय हरिकेशायोप वीतिने पुष्टाना म् |
| ३३ | हरिकेशायेति हरि = केशाय |
| ३४ | उपवीतिने पुष्टाना म् पुष्टाना मुपवीतिन उपवीतिने पुष्टानां पतये पतये पुष्टाना मुपवीतिन उपवीतिने पुष्टानां पतये |
| ३५ | उपवीतिन इत्युप = वीतिने |
| ३६ | पुष्टानां पतये पतये पुष्टाना म् पुष्टानां पतये नमो नमस्पतये पुष्टाना म् पुष्टानां पतये नम : |
| ३७ | पतये नमो नमस्पतये पतये नमो नम : |
| ३८ | नमो नम : |

| | |
|---|---|
| ३९ | नमो भवस्य भवस्य नमो नमो भवस्य हेत्यै हेत्यै भवस्य नमो नमो भवस्य हेत्यै |
| ४० | भवस्य हेत्यै हेत्यै भवस्य भवस्य हेत्यै जगता ञ्जगता॒ हेत्यै भवस्य भवस्य हेत्यै जगताम् |
| ४१ | हेत्यै जगता ञ्जगता॒ हेत्यै हेत्यै जगतां पतये पतये जगता॒ हेत्यै हेत्यै जगतां पतये |
| ४२ | जगतां पतये पतये जगता ञ्जगतां पतये नमो नमस्पतये जगता ञ्जगतां पतये नम : |
| ४३ | पतये नमो नमस्पतये पतये नमो नम : |
| ४४ | नमो नम : |
| ४५ | नमो रुद्राय रुद्राय नमो नमो रुद्रायात तावि्न आततावि्ने रुद्राय नमो नमो रुद्रायात तावि्ने |
| ४६ | रुद्रायात तावि्न आततावि्ने रुद्राय रुद्रायात ताविने क्षेत्राणाङ् क्षेत्राणामात तावि्ने रुद्राय<br>रुद्रायात ताविने क्षेत्राणाम् |

| | |
|---|---|
| ४७ | आततताविने क्षेत्राणाङ् क्षेत्राणामात ताविने आततताविने क्षेत्राणां पतये पतये क्षेत्राणामात ताविने आततताविने क्षेत्राणां पतये |
| ४८ | आततताविन इत्या = तताविने |
| ४९ | क्षेत्राणां पतये पतये क्षेत्राणाङ् क्षेत्राणां पतये नमो नमस्पतये क्षेत्राणाङ् क्षेत्राणां पतये नम : |
| ५० | पतये नमो नमस्पतये पतये नमो नम : |
| ५१ | नमो नम : |
| ५२ | नम स्सूताय सूताय नमो नम स्सूताया हन्त्याया हन्त्याय सूताय नमो नम स्सूताया हन्त्याय |
| ५३ | सूताया हन्त्याया हन्त्याय सूताय सूताया हन्त्याय वनानाँ वनाना महन्त्याय सूताय सूताया हन्त्याय वनानाम् |

| | |
|---|---|
| ५४ | अहन्त्याय वनानाँ वनाना महन्त्याया हन्त्याय वनानां पतये पतये वनाना महन्त्याया हन्त्याय वनानां पतये |
| ५५ | वनानां पतये पतये वनानाँ वनानां पतये नमो नमस्पतये वनानाँ वनानां पतये नमः |
| ५६ | पतये नमो नमस्पतये पतये नमो नमः |
| ५७ | नमो नमः |
| ५८ | नमो रोहिताय रोहिताय नमो नमो रोहिताय स्थपतये स्थपतये रोहिताय नमो नमो रोहिताय स्थपतये |
| ५९ | रोहिताय स्थपतये स्थपतये रोहिताय रोहिताय स्थपतये वृक्षाणाँ वृक्षाणाꣳ स्थपतये रोहिताय रोहिताय स्थपतये वृक्षाणाम् |

| | |
|---|---|
| ६० | स्थपतये वृक्षाणाँ वृक्षाणाꣳ स्थपतये स्थपतये वृक्षाणां पतये पतये वृक्षाणाꣳ स्थपथये स्थपतये वृक्षाणां पतये |
| ६१ | वृक्षाणां पतये पतये वृक्षाणाँ वृक्षाणां पतये नमो नमस्पतये वृक्षाणाँ वृक्षाणां पतये नम : |
| ६२ | पतये नमो नमस्पतये पतये नमो नम : |
| ६३ | नमो नम : |
| ६४ | नमो मन्त्रिणे मन्त्रिणे नमो नमो मन्त्रिणे वाणिजाय वाणिजाय मन्त्रिणे नमो नमो मन्त्रिणे वाणिजाय |
| ६५ | मन्त्रिणे वाणिजाय वाणिजाय मन्त्रिणे मन्त्रिणे वाणिजाय कक्षाणाङ् कक्षाणाँ वाणिजाय मन्त्रिणे मन्त्रिणे वाणिजाय कक्षाणाम् |

| | |
|---|---|
| ६६ | वाणिजाय कक्षाणाङ् कक्षाणाँ वाणिजाय वाणिजाय कक्षाणां पतये पतये कक्षाणाँ वाणिजाय वाणिजाय कक्षाणां पतये |
| ६७ | कक्षाणां पतये पतये कक्षाणाङ् कक्षाणां पतये नमो नमस्पतये कक्षाणाङ् कक्षाणां पतये नमः |
| ६८ | पतये नमो नमस्पतये पतये नमो नमः |
| ६९ | नमो नमः |
| ७० | नमो भुवन्तये भुवन्तये नमो नमो भुवन्तये वारिवस्कृताय वारिवस्कृताय भुवन्तये नमो नमो भुवन्तये वारिवस्कृताय |
| ७१ | भुवन्तये वारिवस्कृताय वारिवस्कृताय भुवन्तये भुवन्तये वारिवस्कृता यौषधीना मोषधीनाँ वारिवस्कृताय भुवन्तये भुवन्तये वारिवस्कृता यौषधीनाम् |

| | |
|---|---|
| ७२ | वारिवस्कृता यौषधीना मोषधीनाँ वारिवस्कृताय वारिवस्कृता यौषधीनां पतये पतय ओषधीनाँ वारिवस्कृताय वारिवस्कृता यौषधीनां पतये |
| ७३ | वारिवस्कृतायेति वारिव : = कृताय |
| ७४ | ओषधीनां पतये पतय ओषधीना मोषधीनां पतये नमो नमस्पतय ओषधीना मोषधीनां पतये नम : |
| ७५ | पतये नमो नमस्पतये पतये नमो नम : |
| ७६ | नमो नम : |
| ७७ | नम उच्चैर्घोषा योच्चैर्घोषाय नमो नम उच्चैर्घोषाया क्रन्दयत आक्रन्दयत उच्चैर्घोषाय नमो नम उच्चैर्घोषाया क्रन्दयते |

| | |
|---|---|
| ७८ | उच्चैर्घोषाया क्रन्दयत आक्रन्दयत उच्चैर्घोषा योच्चैर्घोषाया क्रन्दयते पत्तीनां पत्तीना मा क्रन्दयत उच्चैर्घोषा योच्चैर्घोषाया क्रन्दयते पत्तीनाम् |
| ७९ | उच्चैर्घोषायेत्युच्चै : = घोषाय |
| ८० | आक्रन्दयते पत्तीनां पत्तीना मा क्रन्दयत अक्रन्दयते पत्तीनां पतये पतये पत्तीना मा क्रन्दयत अक्रन्दयते पत्तीनां पतये |
| ८१ | आक्रन्दयत इत्या = क्रन्दयते |
| ८२ | पत्तीनां पतये पतये पत्तीनां पत्तीनां पतये नमो नमस्पतये पत्तीनां पत्तीनां पतये नम : |
| ८३ | पतये नमो नमस्पतये पतये नमो नम : |
| ८४ | नमो नम : |

| | |
|---|---|
| ८५ | नमः कृथ्स्नवीताय कृथ्स्नवीताय नमो नमः कृथ्स्नवीताय धावते धावते कृथ्स्नवीताय नमो नमः कृथ्स्नवीताय धावते |
| ८६ | कृथ्स्नवीताय धावते धावते कृथ्स्नवीताय कृथ्स्नवीताय धावते सत्वनाꣳ सत्वना न्धावते कृथ्स्नवीताय कृथ्स्नवीताय धावते सत्वनाम् |
| ८७ | कृथ्स्नवीतायेति कृथ्स्न = वीताय |
| ८८ | धावते सत्वनाꣳ सत्वना न्धावते धावते सत्वनां पतये पतये सत्वना न्धावते धावते सत्वनां पतये |
| ८९ | सत्वनां पतये पतये सत्वनाꣳ सत्वनां पतये नमो नमस्पतये सत्वनाꣳ सत्वनां पतये नमः |
| ९० | पतये नमो नमस्पतये पतये नमः |
| ९१ | नम इति नमः |

# नमस्सहमानाय

| | |
|---|---|
| १ | नम स्सहमानाय सहमानाय नमो नम स्सहमानाय निव्याधिने निव्याधिने सहमानाय नमो नम स्सहमानाय निव्याधिने। |
| २ | सहमानाय निव्याधिने निव्याधिने सहमानाय सहमानाय निव्याधिन आव्याधिनीना माव्याधिनीना न्निव्याधिने सहमानाय सहमानाय निव्याधिन आव्याधिनीनाम् |
| ३ | निव्याधिन आव्याधिनीना माव्याधिनीना न्निव्याधिने निव्याधिन आव्याधिनीनां पतये पतय आव्याधिनीना न्निव्याधिने निव्याधिन आव्याधिनीनां पतये |
| ४ | निव्याधिन इतिनि = व्याधिने॥ |

| | |
|---|---|
| ५ | आव्याधिनीनां पतये पतय आव्याधिनीना माव्याधिनीनां पतये नमो नमस्पतय आव्याधिनीना माव्याधिनीनां पतये नमः |
| ६ | आव्याधिनीना मित्या = व्याधिनीनाम् |
| ७ | पतये नमो नमस्पतये पतये नमो नमः |
| ८ | नमो नमः |
| ९ | नमः ककुभाय ककुभाय नमो नमः ककुभाय निषङ्गिणे निषङ्गिणे ककुभाय नमो नमः ककुभाय निषङ्गिणे |
| १० | ककुभाय निषङ्गिणे निषङ्गिणे ककुभाय ककुभाय निषङ्गिणे स्तेनाना९ँ स्तेनानां न्निषङ्गिणे ककुभाय ककुभाय निषङ्गिणे स्तेनानाम् |

| | |
|---|---|
| ११ | निषङ्गिणें स्तेनानाꣳ स्तेनानां न्निषङ्गिणें निषङ्गिणें स्तेनानां पतये पतये स्तेनानां न्निषङ्गिणें निषङ्गिणें स्तेनानां पतये |
| १२ | निषङ्गिण इति नि = सङ्गिनें |
| १३ | स्तेनानां पतये पतये स्तेनानाꣳ स्तेनानां पतये नमो नमस्पतये स्तेनानाꣳ स्तेनानां पतये नमः |
| १४ | पतये नमो नमस्पतये पतये नमो नमः |
| १५ | नमो नमः |
| १६ | नमो निषङ्गिणें निषङ्गिणे नमो नमो निषङ्गिण इषुधिमत इषुधिमतें निषङ्गिणे नमो नमो निषङ्गिण इषुधिमतें |

| | |
|---|---|
| १७ | निषङ्गिण इषुधिमत इषुधिमते निषङ्गिणे निषङ्गिण इषुधिमते तस्कराणा न्तस्कराणा मिषुधिमते निषङ्गिणे निषङ्गिण इषुधिमते तस्कराणाम् |
| १८ | निषङ्गिण इति नि = सङ्गिने |
| १९ | इषुधिमते तस्कराणा न्तस्कराणा मिषुधिमत इषुधिमते तस्कराणां पतये पतये तस्कराणा मिषुधिमत इषुधिमते तस्कराणां पतये |
| २० | इषुधिमत इतीषुधि = मते |
| २१ | तस्कराणां पतये पतये तस्कराणा न्तस्कराणां पतये नमो नमस्पतये तस्कराणा न्तस्कराणां पतये नम : |
| २२ | पतये नमो नमस्पतये पतये नमो नम : |

| | |
|---|---|
| २३ | नमो नम : |
| २४ | नमो वञ्चते वञ्चते नमो नमो वञ्चते परिवञ्चते परिवञ्चते वञ्चते नमो नमो वञ्चते परिवञ्चते |
| २५ | वञ्चते परिवञ्चते परिवञ्चते वञ्चते वञ्चते परिवञ्चते स्तायूनाꣳ स्तायूनां परिवञ्चते वञ्चते वञ्चते परिवञ्चते स्तायूनाम् |
| २६ | परिवञ्चते स्तायूनाꣳ स्तायूनां परिवञ्चते परिवञ्चते स्तायूनां पतये पतये स्तायूनां परिवञ्चते परिवञ्चते स्तायूनां पतये |
| २७ | परिवञ्चत इति परि = वञ्चते |
| २८ | स्तायूनां पतये पतये स्तायूनाꣳ स्तायूनां पतये नमो नमस्पतये स्तायूनाꣳ स्तायूनां पतये नम : |

| | |
|---|---|
| २९ | पतये नमो नमस्पतये पतये नमो नमः |
| ३० | नमो नमः |
| ३१ | नमो निचेरवे निचेरवे नमो नमो निचेरवे परिचराय परिचराय निचेरवे नमो नमो निचेरवे परिचराय |
| ३२ | निचेरवे परिचराय परिचराय निचेरवे निचेरवे परिचरायारण्याना मरण्यानां परिचराय निचेरवे निचेरवे परिचरायारण्यानाम् |
| ३३ | निचेरव इति नि = चेरवे |
| ३४ | परिचरायारण्याना मरण्यानां परिचराय परिचरायारण्यानां पतये पतये ऽरण्यानां परिचराय परिचरायारण्यानां पतये |

| | |
|---|---|
| ३५ | परिचरायेति परि = चराय |
| ३६ | अरण्यानां पतये पतये ऽरण्याना मरण्यानां पतये नमो नमस्पतये ऽरण्याना मरण्यानां पतये नमः |
| ३७ | पतये नमो नमस्पतये पतये नमो नमः |
| ३८ | नमो नमः |
| ३९ | नमः स्सृकाविभ्यः स्सृकाविभ्यो नमो नमः स्सृकाविभ्यो जिघाꣳसद्भ्यो जिघाꣳसद्भ्यः स्सृकाविभ्यो नमो नमः स्सृकाविभ्यो जिघाꣳसद्भ्यः |
| ४० | सृकाविभ्यो जिघाꣳसद्भ्यो जिघाꣳसद्भ्यः स्सृकाविभ्यः स्सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां मुष्णता ञ्जिघाꣳसद्भ्यः स्सृकाविभ्यः स्सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णताम् |

| | |
|---|---|
| ४१ | सृकाविभ्य इति सृकावि = भ्य : |
| ४२ | जिघांꣳसद्भ्यो मुष्णतां मुष्णता ञ्जिघांꣳसद्भ्यो जिघांꣳसद्भ्यो मुष्णतां पतये पतये मुष्णता ञ्जिघांꣳसद्भ्यो जिघांꣳसद्भ्यो मुष्णतां पतये |
| ४३ | जिघांꣳसद्भ्य इति जिघांꣳसत् = भ्य : |
| ४४ | मुष्णतां पतये पतये मुष्णतां मुष्णतां पतये नमो नमस्पतये मुष्णतां मुष्णतां पतये नम : |
| ४५ | पतये नमो नमस्पतये पतये नमो नम : |
| ४६ | नमो नम : |
| ४७ | नमो ङसिमद्भ्यो ङसिमद्भ्यो नमो नमो ङसिमद्भ्यो नक्त न्नक्तम सिमद्भ्यो नमो नमो ङसिमद्भ्यो नक्त म् |

| | |
|---|---|
